# shrIsaubhAgyakavacham 2

# શ્રીસૌભાગ્યકવચમ્ ૨

## Document Information

Text title : Saubhagyakavacham 2

File name : saubhAgyakavacham2.itx

Category : devii, kavacha, dashamahAvidyA, devI

Location : doc_devii

Description/comments : vAmakeshvarantantre nityAShoDashikArNave. See other alternate edited version.

Latest update : March 7, 2020, July 5, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

July 5, 2021

*sanskritdocuments.org*

# શ્રીસૌભાગ્યકવચમ્ ૨

ૐ શ્રીગણેશાય નમઃ ।
શ્રીગુરુભ્યોનમઃ હરિઃ ૐ ।
કૈલાસશિખરે રમ્યે સુખસીનં સુરાર્ચિતમ્ ।
ગિરીશં ગિરિજા નત્વા સ્તોત્રૈર્વેદાર્થગોચરૈઃ  ॥ ૧॥

પ્રણમ્ય પરયા ભક્ત્યા તમપૃચ્છત્કૃતાઞ્જલિઃ ।
શ્રીદેવ્યુવાચ -
રહસ્યં રક્ષણકરં સર્વસમ્પત્કરં વદ  ॥  ૨॥

ઈશ્વર ઉવાચ -
એતત્સૌભાગ્યકવચં રહસ્યાતિરહસ્યકમ્ ।
સૌભાગ્યકવચં દેવિ શ ृણુ સૌભાગ્યદં પરમ્  ॥  ૩॥

(મૂલવિદ્યયા ઋષ્યાદિન્યાસમ્)
ધ્યાનમ્ -
શોણપ્રભં સોમકલાવતંસં પાણિસ્ફુરત્પઞ્ચશરેક્ષુચાપમ્ ।
પ્રાણપ્રિયં નૌમિ પિનાકપાણિં કોણત્રયસ્થં કુલદૈવતં મે  ॥

ઇક્ષુકોદણ્ડપુષ્પેષુપાશાઙ્કુશચતુર્ભુજામ્ ।
ઉદ્યત્સૂર્યનિભાં વન્દે દેવીં ત્રિપુરસુન્દરીમ્  ॥

અથ કવચમ્ ।
ૐ શિખાયાં સતતં પાતુ મહાત્રિપુરસુન્દરી ।
શિરઃ કમેશ્વરી નિત્યા તત્પૂર્વાઙ્ગં ભગમાલિની  ॥ ૧॥

નિત્યક્લિન્ના ચ તદ્દક્ષં ભેરુણ્ડા પશ્ચિમં શિરઃ ।
વહ્નિવાસિન્યસ્ય વામં વજ્રેશ્વર્યલકાંસ્તથા  ॥  ૨॥

શિવદૂતી લલાટં ચ ત્વરિતા તસ્ય દક્ષિણમ્ ।
તદ્વામપાર્શ્વમવતાત્તથૈવ કુલસુન્દરી  ॥  ૩॥

નિત્યા પાતુ ભ્રુવોર્મધ્યં ભ્રુવં નીલપતાકિની ।
વામભ્રુવં ચ વિજયા નયનં સર્વમઙ્ગલા ॥ ૪॥

જ્વાલામાલિન્યક્ષિ વામં ચિત્રા રક્ષતુ નાસિકામ્ ।
દક્ષશ્રોત્રં તુ ગણપઃ સ્વયં પાતુ મહોદધિમઃ ॥ ૫॥

દક્ષસવ્યન્તુ બટુકઃ કપોલં ક્ષેત્રપાલકઃ ।
દક્ષનાસાપુટં દુર્ગા તદન્યં પાતુ ભારતી ॥ ૬॥

અણિમા દક્ષિણં શઙ્ખં મહિમા ચ તદન્યકમ્ ।
દક્ષગણ્ડં તુ ગરિમા લઘિમા ચોત્તરં તથા ॥ ૭॥

ઊર્ધ્વમોષ્ઠં પ્રાપ્તિસિદ્ધિઃ પ્રાકામ્યમધરોષ્ઠકમ્ ।
ઈષિત્વમૂર્ધ્વદન્તાંશ્ચ વશિત્વમધરાંસ્તથા ॥ ૮॥

ઇછાસિદ્ધિસ્તુ રસનાં મોક્ષસિદ્ધિસ્તુ તલુકમ્ ।
તાલુમૂલદ્વયં બ્રાહ્મી માહેશ્વર્યૌત્તરક્ષતામ્ ॥ ૯॥

કુમારી ચિબુકં પાતુ તદધઃ પાતુ વૈષ્ણવી ।
કણ્ઠં રક્ષતુ વારાહી ઇન્દ્રાણી રક્ષતાદધઃ ॥ ૧૦॥

કૃકાટિકાં તુ ચામુણ્ડા મહાલક્ષ્મીસ્તુ સર્વતઃ ।
સર્વસંક્ષોભિણીમુદ્રા સ્કન્ધં રક્ષતુ દક્ષિણમ્ ॥ ૧૧॥

તદન્યં દ્રાવિણીમુદ્રા પાયાદંસદ્વયં ક્રમાત્ ।
આકર્ષવશ્યમુદ્રે દ્વે ચોન્માદિન્યથ દક્ષિણમ્ ॥ ૧૨॥

ભુજં મહાઙ્કુશા વામં ખેચરી દક્ષકક્ષકમ્ ।
વામકક્ષં બીજમુદ્રા યોનિઃસ્થાદ્દક્ષબાહુકમ્ ॥ ૧૩॥

લસત્ત્રિખણ્ડિની મુદ્રા વામબાહું પ્રપાલયેત્ ।
કામાકર્ષિણિકા નિત્યં રક્ષતાદ્દક્ષકૂર્પરમ્ ॥ ૧૪॥

કૂર્પરં વામમવતાદ્બુધ્યાકર્ષિણિકા તથા ।
અહઙ્કારાકર્ષિણી તુ પ્રકોષ્ઠં પાતુ દક્ષિણમ્ ॥ ૧૫॥

શબ્દાકર્ષિણિકા વામં સ્પર્શાકર્ષિણિકાવતુ ।
તન્મધ્યં દક્ષિણં પાતુ રૂપાકર્ષિણિકેતરમ્ ॥ ૧૬॥

રસાકર્ષિણિકા પાતુ મણિબન્ધં ચ દક્ષિણમ્ ।
ગન્ધાકર્ષિણિકા વામં ચિત્તાકર્ષિણિકાવતુ ॥ ૧૭॥

કરભં દક્ષિણં ધૈર્યાકર્ષિણી પાતુ વામકમ્ ।
સ્મૃત્યાકર્ષિણ્યસૌ પાણિં નામાકર્ષિણિ દક્ષિણમ્ ॥ ૧૮॥

બીજાકર્ષિણ્યસૌ પાયાત્સતતં દક્ષિણાઙ્ગુલીઃ ।
આત્માકર્ષિણ્યદક્ષિણ્યામમૃતાકર્ષિણી નખાન્ ॥ ૧૯॥

શરીરાકર્ષિણી વામનખાન્ રક્ષતુ સર્વદા ।
અનઙ્ગકુસુમા શક્તિઃ પાતુ દક્ષસ્તનોપરિ ॥ ૨૦॥

અનઙ્ગમેખલા ચાન્યસ્તનોર્ધ્વમભિરક્ષતુ ।
અનઙ્ગમદના દક્ષસ્તનં તચ્ચૂચુકં પુનઃ ॥ ૨૧॥

રક્ષતાદનિશં દેવી અનઙ્ગમદનાતુરા ।
સ્તનયોર્મધ્યમં પાયાદનઙ્ગમદનાતુરા
અનઙ્ગરેખા વામઞ્ચ વક્ષોજં તસ્ય ચૂચુકમ્ ॥ ૨૨॥

અનઙ્ગવેગિની ક્રોડામનઙ્ગસ્યાઙ્કુશાવતુ ।
અનઙ્ગમાલિની પાયાદ્વક્ષસ્થલમહર્નિશમ્ ॥ ૨૩॥

સર્વસંક્ષોભિણી હૃચ્ચ સર્વવિદ્રાવિણી પરા ।
કુક્ષિં સર્વાકર્ષિણી પાતુ પાતુ પાર્શ્વં તુ દક્ષિણમ્ ॥ ૨૪॥

આહ્લાદિની વામપાર્શ્વં મધ્યં સમ્મોહિની પરા ।
સા સર્વસ્તમ્ભિની પૃષ્ઠં નાભિં વૈ સર્વજૃમ્ભિણી ॥ ૨૫॥

વશઙ્કરી વસ્તિદેશં કટિં સા સર્વરઞ્જિની ।
ઉન્માદિની તુ સર્વાદ્યા પાયાજ્જઘનમણ્ડલમ્ ॥ ૨૬॥

સર્વાર્થસાધિનીશક્તિર્નિતમ્બં રક્ષતાદથ ।
દક્ષસ્ફિચં સદા પાતુ સર્વસમ્પત્પ્રપૂરિણી ॥ ૨૭॥

સર્વમન્ત્રમયીશક્તિઃ પાતુ વામસ્ફિચં મમ ।
પાયાત્કુન્દરદ્વન્દ્વં સર્વદ્વન્દ્વક્ષયઙ્કરી ॥ ૩૧॥

સર્વસિદ્ધિપ્રદા દેવી વૃષણં પાતુ દક્ષિણમ્ ।
સર્વસમ્પત્પ્રદા દેવી વૃષણં પાતુ વામકમ્ ॥ ૩૨॥

સર્વપ્રિયઙ્કરી દેવી ગુહ્યં રક્ષતુ મે સદા ।
મેઢ્રં રક્ષતુ મે દેવી સર્વમઙ્ગલકારિણી ॥ ૩૩॥

સર્વકામપ્રદા દેવી પાતુ મુષ્કં તુ દક્ષિણમ્ ।
તયોર્મદ્ધ્યં સદા પાતુ સર્વકામફલપ્રદા ।
પાયાત્તદન્યં દેવી તુ સર્વદુઃખવિમોચિની ॥ ૩૪॥

સર્વમૃત્યુપ્રશમની દેવી પાતુ ગુદં મમ ।
પાતુ દેવી દેહમદ્ધ્યં સર્વવિઘ્નનિવારિણી ॥ ૩૫॥

સર્વાઙ્ગસુન્દરી દેવી રક્ષતાદ્દક્ષસક્થિકમ્ ।
વામસક્થિતલં પાયત્સર્વસૌભાગ્યદાયિની ॥ ૩૬॥

અષ્ઠીવં મમ સર્વજ્ઞા દેવી રક્ષતુ દક્ષિણમ્ ।
અન્યષ્ઠીવં સર્વશક્તિર્દેવી પાતુ ચિરં મમ ॥ ૩૭॥

સર્વૈશ્વર્યપ્રદા દેવી દક્ષજાનું સદાવતુ ।
સર્વજ્ઞાનમયી દેવી તદન્યજ્જાનુ રક્ષતુ ॥ ૩૮॥

અવ્યાદિયં દક્ષજઙ્ઘાં સર્વવ્યાધિવિનાશિની ।
તદન્યં પાતુ દેવી ચ સર્વાધારસ્વરૂપિણી ॥ ૩૯॥

સર્વપાપહરા દેવી દક્ષગુલ્ભં સદાવતુ ।
સર્વાનન્દમયી દેવી વામગુલ્ફં સદાવતુ ॥ ૪૦॥

પાર્ષ્ણિં મે દક્ષિણં પાયાત્સર્વરક્ષાસ્વરૂપિણી ।
અવ્યાત્સવ્યં સદા પાર્ષ્ણિં સર્વેપ્સિતફલપ્રદા ॥ ૪૧॥

દક્ષાઙ્ઘ્રિં વશિની પાતુ પૂર્વં વાગ્દેવતા મમ ।
સર્વકામેશ્વરી પુર્વં સદા વાગ્દેવતોત્તરમ્ ॥ ૪૨॥

મોદિની પ્રપદં પાતુ દક્ષિણં વિમલેતરમ્ ।
અઙ્ગુલીરરુણા પાતુ દક્ષપાદનખોજ્જ્વલા ॥ ૪૩॥

તદન્યં જયિની પાયાત્સદા વાગ્દેવતેતરમ્ ।
દક્ષપાદલં સર્વેશ્વરી વાગ્દેવતા મુદા ॥ ૪૪॥

વામપાદતલં પાયાત્કૌલિની દેવતા મમ ।
કુર્વન્તુ જૃમ્ભણા બાણાસ્ત્રૈલોક્યકર્ષણં મમ ॥ ૪૫॥

મોહં સંહરતાદ્દિક્ષુ કોદણ્ડં ભૃઙ્ગમૌર્વિકમ્ ।
કરોતુ સતતં પાશી વશીકરણમુત્તમમ્ ॥ ૪૬॥

વિદધાત્વઙ્કુશા નિત્યં સ્તમ્ભનં શત્રુસઙ્ગરે ।

પીઠં મે કામરૂપાખ્યા પાતુ કામાન્નિકામતઃ ॥ ૪૭॥

પૂર્ણં પૂર્ણગિરેઃ પીઠં પાયાદર્થં મદીયકમ્ ।
જાલન્ધરસ્ય જાલન્ધ્રં પીઠં રક્ષતુ મે સદા ॥ ૪૮॥

(/પૂર્ણં પુર્ણાગિરીપીઠં પયાદર્થં મદીયકમ્ ॥ ૪૮॥)
સાયુજ્યં તનુતાં પ્રાજ્યં શ્રીપીઠં શ્રીકરં મમ ।
કામેશ્વરી ચાત્મતત્ત્વં રક્ષેદ્વજ્રેશ્વરી ચ મામ્ ॥ ૪૯॥

વિદ્યાતત્ત્વં શૈવતત્ત્વં પાયાચ્છ્રી ભગમાલિની ।
કામં છિન્દ્યાન્મહાશત્રુમમૃતાર્ણવમાસનમ્ ॥ ૫૦॥

ક્રોધં બોધાપહં હન્યાદ્રક્તપોતામ્બુજાસનમ્ ।
લોભં દિવ્યાસનં ભિન્દ્યાદ્દેવ્યાત્મા દિવ્યરૂપભાક્ ॥ ૫૧॥

મોહં સંહરતાચ્ચક્રં મદં મન્ત્રાસનં મહત્ ।
માત્સર્યં નાશયેન્નિત્યં મમ સાધ્યાસનં જવાત્ ॥ ૫૨॥

આધારં ત્રિપુરા રક્ષેત્સ્વાધિષ્ઠાનં પુરેશ્વરી ।
મણિપૂરં મણિદ્યોતં પાયાત્ત્રિપુરસુન્દરી ॥ ૫૩॥

અવ્યાદનાહતં ભવ્યં  નિત્યં ત્રિપુરવાસિની ।
વિશુદ્ધં ત્રિપુરાશ્રીશ્ચ આજ્ઞા ત્રિપુરમાલિની ॥ ૫૪॥

ઇડાં મે ત્રિપુરા સિદ્ધા ત્રિપુરામ્બા ચ પિઙ્ગલામ્ ।
સુષુમ્નાં પાતુ મે નિત્યં મહાત્રિપુરસુન્દરી ॥ ૫૫॥

ત્રૈલોક્યમોહનં ચક્રં રોમકૂપાંશ્ચ પાતુ મે ।
સર્વાશાપૂરકં ચક્રં સપ્તધાતૂંશ્ચ રક્ષતુ ॥ ૫૬॥

સર્વસંક્ષોભણં ચક્રં પ્રાણાદ્યં વાયુપઞ્ચકમ્ ।
સૌભાગ્યદાયકં ચક્રં નાગાદ્યાનિલપઞ્ચકમ્ ॥ ૫૭॥

સર્વાર્થસાધકં ચાન્તઃકરણાનાં ચતુષ્ટયમ્ ।
સર્વરક્ષાકરં ચક્રં પાયાત્પૂર્તેષ્ટકં ચ મે ॥ ૫૮॥

સર્વરોગહરં ચક્રં રક્ષતાન્મે ગુણત્રયમ્ ।
સર્વસિદ્ધિપ્રદં ચક્રં મમાવ્યાત્કોશપઞ્ચકમ્ ॥ ૫૯॥

સર્વાનન્દમયં ચક્રં યશઃ કીર્તિં ચ રક્ષતુ ।
સૌન્દર્યમન્મથઃ પાયાદ્રતિઃ પાતુ રતિં મમ ॥ ૬૦॥

પ્રીતિર્મે પાતુ સા પ્રીતિરુત્સાહં ચ વસન્તકઃ ।
સઙ્કલ્પં કલ્પકોદ્યાનં મહાલક્ષ્મીર્મમ શ્રિયમ્ ॥ ૬૧॥

કાન્તિં કપાલિની રક્ષેન્મન્દિરં મમ મન્ડપમ્ ।
પુત્રાન્ શઙ્ખનિધિઃ પાયાદ્ભાર્યાં પદ્મનિધિસ્તથા ॥ ૬૨॥

માર્ગે માં ભૈરવી રક્ષેન્માતઙ્ગી મુકુટં સદા ।
અષ્ટદિક્ષુ મહેન્દ્રાદ્યાઃ સાયુધાઃપાન્તુ માં સદા ॥ ૬૩॥

પાયાદૂર્ધ્વદિશં બ્રહ્મા વિષ્ણુશ્ચક્રાયુધો ત્વધઃ ।
અનાવૃતાનિ સ્થાનાનિ કવચેન તુ યાનિ મે ॥ ૬૪॥

તાનિ રક્ષન્તુ સતતં શિવાદિ ગુરવઃ ક્રમાત્ ।
એતત્સૌભાગ્યકવચં સ્વકરે યસ્તુ ધારયેત્ ॥ ૬૫॥

ત્રિસન્ધ્યં પઠતિ પ્રીત્યા શ ૃણુયાદ્વા સમાહિતઃ ।
તસ્ય શીઘ્રેણ સિધ્યન્તિ સિદ્ધયસ્ત્વણિમાદયઃ ॥ ૬૭॥

બ્રહ્મવિત્તુ ગિરીશેન્દ્રકન્દર્પરવિભિઃ સમઃ ।
વિહરત્યખિલાન્ લોકાન્ સિદ્ધગન્ધર્વસેવિતઃ ॥ ૬૮॥

તસ્ય સ્મરણમાત્રેણ મહાભૂતપિશાચકાઃ ।
કીટવત્પ્રપલાયન્તે કૂષમાણ્ડા ભૈરવાદયઃ ॥ ૬૯॥

તસ્યાઙ્ઘ્રિતોયપતનાત્ પ્રશામ્યન્તિ મહારુજઃ ।
તત્પાદકમલાસક્તરજોલેશાભિમર્શનાત્ ॥ ૭૦॥

વશ્યં ભવતિ શીઘ્રેણ ત્રૈલોક્યં સચરાચરમ્ ।
ભૂપાલમહિલા ભૂપાઃ કિમુ માયા વિમોહિતાઃ ॥ ૭૧॥

ઇતિ શ્રીવામકેશ્વરતન્ત્રે નિત્યા ષોડશાર્ણવર
સૌભાગ્યકવચં સમાપ્તમ્ ।
શુભમસ્તુ ।
શ્રીશુભમ્ ।

The kavacha text has quite a few variations from the one already posted with detailed nyAsa.

Encoded by Sivakumar Thyagarajan Iyer

Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*shrIsaubhAgyakavacham 2*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*